विषय-सूची

गुरुकुल-पत्रिका का वार्षिक मूल्य --

देश में - ४ रुपये, विदेश में - ७ रुपये, एक प्रति - ४० पसे

पृष्ठ ४९६ से आगे--

हिन्दी में भाषण न दे सकने के कारण क्षमा प्रार्थना कर मान्य श्रममन्त्री जी ने कहा कि मैं गुरुकुल में श्रममन्त्री की हैसियत से नहीं अपितु गुरुकुल का प्रशंसक व प्रेमी होने के नाते आया हूं। स्वामी दयानन्द जी व स्वामी श्रद्धानन्द जी का लक्ष्य एक ही था। वे समाज में वर्गभेद नहीं चाहते थे। गुरुकुल संस्था उस को मिटाने का एक प्रतीक है। मानव जीवन में जो उदात्त है, सुन्दर है, सरल है गुरुकुल उसका पोषक है अत: गुरुकुल जैसी संस्थाओं का निर्माण हो। समाजवाद का उद्देश्य व्यक्तियों को आर्थिक दृष्टि से उन्नत करने के साथ२चरित्र को भी ऊंचा उठाना है। अन्त में मान्य अतिथि ने कहा "मेरा सौभाग्य है कि मैं गुरुकुल में आया और यहां के विद्वान कुलपति जी से विचार कर गुरुकुल की उन्नति और आदर्शों का परिचय प्राप्त कर सका। मैं समस्त कुलवासियों का आभारी हूं।'

आंग्लभाषा विभाग के अध्यक्ष प्रो० श्रीसदाशिव जी भगत ने मान्य अतिथि के अंग्रेजी भाषण को साथ ही साथ हिन्दी में अनुवाद कर सुनाया।

शोक समाचार

हमें यह समाचार देते हुए महान् हार्दिक दु:ख है कि गुरुकुल कांगड़ी विश्वविद्यालय के सुयोग्य स्नातक श्री युधिष्ठिर विद्यालंकार का बम्बई में २ अगस्त १९७४ को अचानक हृदयगतिरुद्ध हो जाने से स्वर्गवास हो गया। वे महान् कर्मठव्यक्ति थे। सन् १९३४ में गुरुकुल से स्नातक बनने के बाद उन्होंने पत्रकारिता का व्यवसाय अपनाया। कुछ काल पश्चात् स्वतन्त्र व्यवसाय के रूप में बम्बई में फिलम इण्डस्ट्रीज में खूब नाम कमाया। उनकी अभी बहुत अधिक आयु भी नहीं हुई थी। कुलवासियों की ओर से हम प्रभु से याचना करते हैं कि वह दिवंगत आत्मा की सद्गति तथा परिजनों को सुख शान्ति व सान्त्वना प्रदान करें।

नव कुलपति अभिनन्दन-समारोह (२-७-१९७४)

आर्य प्रतिनिधि सभा के प्रधान स्वामी इन्द्रवेश जी नव कुलपति डा० सत्यकेतु विद्यालंकार का अभिनन्दन करते हुए

गुरुकुल कांगड़ी विश्वविद्यालय के नव कुलपति डा० सत्यकेतु विद्यालंकार का स्वागत करते हुए स्वामी अग्निवेश जी

दीक्षान्त-समारोह (१२-४-७४)

नव स्नातकों को आशीर्वाद देते हुए गुरुकुल कांगड़ी विश्वविद्यालय के लब्धप्रतिष्ठ पुराने स्नातक डा० सत्यकेतु विद्यालंकार। दायीं ओर चोला पहने हुए गुरुकुल कांगड़ी विश्वविद्यालय के कुलसचिव डा० गंगाराम जी तथा आचार्य रामनाथ जी वेदालंकार

दीक्षान्त-समारोह (१२-४-७४)

मान्य अभ्यागत श्री प्रकाशवीर शास्त्री तथा स्वामी ब्रह्ममुनि जी के साथ कुलाधिपति श्री स्वामी इन्द्रवेश जी, आर्यप्रतिनिधि सभा के उपप्रधान श्री पृथ्वीसिंह जी आजाद और श्री रामगोपाल जी शालवाले तथा मन्त्री श्री वीरेन्द्र जी एवं अन्य अधिकारी गण

दीक्षान्त-समारोह

(१२-४-७४)

गुरुकुल कांगड़ी विश्वविद्यालय के कुलाधिपति स्वामी इन्द्रवेश जी (बायें से ३रे) दीक्षान्तभाषणकर्त्ता स्वामी ब्रह्ममुनि जी (बायें से ४थे), श्री वीरेन्द्र जी (बायें से २रे), श्री मरवाहा जी तथा अन्य अधिकारीगण नवस्नातकों के साथ

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

श्रावण २०३१, अगस्त १६७४, वर्षम्-२६, अङ्कः १२, पूर्णाङ्कः ३०८

ओ३म् सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वां उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ।।७।।

(अवनयः न) जिस प्रकार अङ्गुलियां किसी पदार्थ को थामने के लिये (सं यन्ति) मिल कर जाती हैं और (न) जिस प्रकार (रोधचक्राः) अवरोध तथा चक्र=भंवर वाली (स्रवतः) नदियां मिलकर (समुद्रं) समुद्र में गिरती हैं उसी प्रकार (स्तुभः) स्तुभनामक ये स्तुतियां स्तुत्य देव को मिलकर थामती हैं । ऐसे स्तुभनामक स्तुति वाले व्यक्ति को (विद्वान् बृहस्पतिः) विद्वान् बृहस्पति आचार्य (गृध्रः) संसार सागर से पार पहुंचाने की इच्छा वाला होकर (अन्तः) अपने अन्दर हृदय गुहा में बैठ शिष्य के (तरः आपश्च) तरणसाधन नौका तथा व्यापक जल (उभयं) दोनों को (चष्टे) देख लेता है ।

रोधचक्राः—रोधचक्राः नदी नाम । निघ. १।१३
रोधाश्चक्राणि च यासु ताः नद्यः—स्वामी दयानन्द

ऐसी नदियां जिनमें बीच २ में अवरोध बने होते हैं तथा चक्र अर्थात् भंवर बनती रहती हैं । यहां स्तुति प्रसंग में ये दोनों भाव दृष्टिगोचर होते हैं । स्तुति प्रवाह के मार्ग में भी अनेकों अवरोध तथा गुमराह करने वाली भंवरें आ जाती हैं । सम्भवतः ये योगज सिद्धियों के रूप में भी हो सकती हैं । जिनके प्रभाव में आकर एक योगी व विज्ञानी पुरुष सीधे मार्ग से भटक जाता है या वहीं रुक जाता है । दूसरी दृष्टि से शिष्य के लिये भी गुरु के प्रति भक्ति व स्तुति में कई अवरोध व गुमराहें पैदा हो जाती हैं, परन्तु विद्वान् बृहस्पति शिष्य के अन्दर बैठकर उसकी सामर्थ्य व उसके तैरने योग्य वासनादि जल प्रवाह को सम्यक् प्रकार से देखलेता है । इसका अन्य भी तात्पर्य हो सकता है ।

अवनयः—अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि । नि. ३।९। अवनि अर्थात् अङ्गुलि का उदाहरण यह दर्शाने के लिये है कि जिस प्रकार अङ्गुलियों की मिलकर पकड़ होती है, उसी प्रकार भिन्न २ स्तुतियों की पकड़ दृढ़ होनी चाहिये, सबका ध्येय व पकड़ एक ही हो ।

—

वेदसंख्या विचारः

प्रा० श्री भद्रसेन, साधु आश्रम, होशियारपुर

केषाञ्चिदियं धारणा यत्पूर्वमेक एव वेद आसीत्, वेदव्यासेन लोककल्याणाय विषयानुसारं वेदस्य चतुर्विधो विभागो विहितः । प्रमाणमत्र वेदं तावद् एकं सन्तमतिबृहत्त्वाद् दुरध्येयं दुर्ज्ञेयमनेक-शाखाभेदेन समाम्नासिषुः सुखग्रहणाय व्यासेन समाम्नातवन्तः । नि. १,२० दुर्गभाष्ये ।

पूर्वं भगवता व्यासेन जगदुपकारार्थमेकीभूय-स्थिताः वेदा व्यस्ताः शाखाश्च परिच्छिन्नाः तै.सं. भूमिकायां भट्टभास्करः ।

तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत् कृपया चतुर्धा व्यस्य ऋग्यजुःसामाथर्वाख्यांश्च चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमात्-उपदिदेश-महीधरः—यजुर्भाष्ये ।

वेदान् विव्यास यस्मात् स तेन व्यास इति स्मृतः ।
अवतीर्णो महाभागो वेदं चक्रे चतुर्विधम् ।।
ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे ।

महाभारते, पुराणेष्वपि मिलति भावनैषा । अपरपक्षेण तु—वेदव्यासतः पूर्वमेव विभक्तानां चतुर्णां वेदानां साहित्ये चर्चोपलभ्यते । पुनः कथं व्यासेन विभागः कृतः । वेदेष्वेव चतुर्णां नामानि प्राप्नुवन्ति । तद्यथा—

१—तस्माद्यज्ञात्सर्वहुतः ' ' ऋग्यजुः ।
२—यस्मादृचोऽपातक्षन्, अथर्व० ।
३—यस्मिन् वेदा निहिता विश्वरूपाः, अ०४,३५,६ अत्र वेदाः बहुवचनम्, पुनः कथमेक एवेति ।
४—एवं वा अरेऽस्य महतो भूतस्य, शतपथ, बृह०-उप०, मै. उप. ।
५—चत्वारि शृंगा-इति वेदा वा एतदुक्ता क. ब्रा. ।
६—चत्वारो हीमे वेदाः—काठक ।
७—यो ब्रह्माणं विदधाति पूर्वं । यो वै वेदांश्च प्रहिणोति-श्वेता-उप० ।
८—तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्च, मुण्डकोपनिषत् ।
९—ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमथर्वाणं चतुर्थम्, छान्दोग्य ।
१०—अग्निवायुरविभ्यस्तु त्रयं ब्रह्म ' मनुस्मृति १, २३ ।
११—चत्वारि शृंगा-। चत्वारो वेदाः नि० १३, ७ महाभाष्येऽपि-एषैव व्याख्या ।

तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदविज्ञाता भवन्ति । तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वश्चेति चरणव्यूह ।

१२—रामायणे हनूमान् महोदयस्य परिचयावसरे—
न ऋग्वेदविनीतस्य न यजुर्वेदधारिणः ।
इति वर्णितम् ।

१३—ऋचो बह्वृच मुख्यैश्च प्रेर्यमाणाः पदक्रमैः ।
शुश्राव मनुजव्याघ्रो—तेषु इह कर्मसु ।। ३१
अथर्ववेदप्रवराः—पंच याज्ञिकाः सम्मताः ।
संहितामीरयन्ति स्म पदक्रमयुतां तु ते ।।
महा. आदिपर्व ६४, ३२ ।

शाकुन्तलोपाख्यानानुसारं दुष्यन्तसमये एषा स्थितिः ।

१४–वेदाः–महा. शल्य ४१, ४; वन २९, ३९।
१५–वेदैश्चतुर्भिः द्रोण ५१, १२।
१६–राज्ञश्चाथर्ववेदेन शा. ७३, ७।

महाभारतस्याध्ययनेन विज्ञायते, यत् श्रीव्यास-महोदयस्य पितृपितामहप्रभृतिभिश्चत्वारो वेदाः पठिताः। यदि तैः चतुर्णामध्ययनं विहितं तर्हि व्यासः कथं तान् व्यभजत्।

उपसंहारः–सम्भवतो वेदव्यासकृतविभागस्यायमभिप्रायः स्यात्, यद् व्यासशिष्यप्रशिष्यैः पाठसंग्रहं विधाय शाखाब्राह्मणानि विरचितानि। तदभिप्रायबोधकमेवेदं मतं प्रतीयते। तथा च वेदान् अनेकधा कर्तुं यदि ते रुचितं प्रभो! महा. शा० ३३६, ३। एवमेव-वेदद्रुमश्च यं प्राप्य सशाखः समपद्यत। वायु० पु० १, ४५॥

आभ्यां प्रमाणाभ्यामपि–एतदेव सिध्यति यद् व्यास एव वेदीयशाखाब्राह्मणग्रन्थानाम् मूलप्रणेता। अत एव वेदविभागकर्तृरूपेण स्मर्यते।

वेदा त्रयश्चत्वारो वा––

प्रथमपक्षः–साहित्ये प्रायः त्रयाणामेव नाम श्रूयते। यथा-त्रयं ब्रह्म सनातनम्, मनुस्मृति १,२३। तेभ्यस्तप्तेभ्यस्त्रयो वेदाअजायन्त, शतपथ। तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। तस्माद्यजुः। वेदैरशून्यैस्त्रिभिरेति सूर्यः तै. ब्रा.। ऋषयस्त्रयिविदो विदुः ऋचः सामानि यजूंषि, तै. ब्रा. १,२,१,२६,। यद्वै यज्ञस्य साम्ना यजुषा क्रियते, शिथिलं तत्। यद् ऋचा तद्दृढम् तै. ६,५,१०,३ त्रिभिर्वेदैर्विधीयते–। तथा देवता-भाषा-भाव-छन्दसामपि नूतनत्वं प्राप्यते।

अतो वक्तुं शक्यते, अथर्ववेदो नूतनः, बहुकालानन्तरं चतुर्थवेदरूपेण स्थानं प्राप्तवान्।

द्वितीयः पक्षः–यस्मादृचोऽपातक्षन्–अथर्व। अस्य महतो भूतस्य–शतपथ। तत्रापरा ऋग्वेदो–मुण्डक। रामायण-महाभारतयोरध्ययनेनापि चतुर्णां नामानि प्राप्नुवन्ति। ऋग्यजुः सामाथर्वणञ्च चत्वारो वेदाः, नृसिंह उप. १, २।

गोपथब्राह्मणे (१,२,११९; १,३,२,) चतुर्णां नामानि मिलन्ति।

बहुषु स्थलेषु त्रयाणामेव नामानि कथमिति कथनस्य समाधानं कुर्वन् श्री सायणाचार्यः अथर्वभूमिकायां प्राह–व्याहृतीनां तिस्रत्वात् क्वचित् त्रयाणामेव चर्चा। कुत्रचित् पूर्वाह्णादि कालाभिप्रायेण, तत्र कालदृष्ट्या, त्रयाणामेव चर्चा। कुत्रचिद् वेदगतमन्त्राभिप्रायेण त्रैविध्यम्। मीमांसादर्शने अस्मिन् विषये विशिष्टा चर्चा वर्तते। तच्चोदकेषु मन्त्राख्या ३२। तेषां ऋग् यत्रार्थवशेन पादव्यवस्था ३५। गीतिषु सामाख्या ३६। शेषे यजुः शब्दः मी. २,१,३७। अर्थात् त्रिविधमन्त्रदृष्ट्या त्रैविध्यं स्वीक्रियते। ज्ञान-कर्म-उपासनाविषयभेदतस्त्रैविध्यम्। वेदास्तु चत्वार एव त्रयाणां नामानि तु विशेषदिशैव।

" विश्वप्रकृतिः कुरुते निरन्तरं भगवते यज्ञम् "

आशा, संस्कृतविभागः, श्री अरविन्दाश्रमः, पाण्डिचेरी

चराचरविश्वं ननु प्रकृतेः यज्ञशाला यत्र सा निरन्तरं यज्ञे व्यापृता । श्रीअरविन्दो यदस्मान् प्रतिपादयति "सम्पूर्णं जीवनं खलु योगः" इति तस्य साक्षात्प्रमाणस्वरूपा सा अस्माकं सम्मुखम् । उच्चादुच्चतरं गच्छन्ती निष्कम्पा, देदीप्यमाना पवित्रनीरवाग्निशिखा इव भगवन्तमभीप्सन्ती सा चराचरं तदेव शिक्षयति । प्रकृतेः दर्शनेन कथं कृत्स्ना सृष्टिः भगवल्लीलां संकीर्तयति इत्यपि स्पष्टमेव ।

अवसन्नायां यामिन्यामागतायां च उषायां पक्षिणां कूजनेन प्रकृतिः चराचरं जागरयति । तस्मिन् समये विहङ्गानां ध्वनिः वेदमन्त्र इव कर्णकुहरे प्रविशति । चतुर्दिग्भ्योऽमृतवर्षां कुर्वती सा आद्योऽपि चिरनूतनः प्रणवनाद इव उद्घोष्यमाणः प्रतीयते । तस्यां मङ्गलवेलायां भगवत्प्रेमपरिप्लाविता धरित्री आनन्दगीतं गायति, शाश्वती परमा शान्तिः सर्वत्र राजते, सुखदः शीतलश्च समीरः नवजीवनस्य सञ्चारं करोति, तृणगुल्मानि नर्तं नर्तमानन्दसमारोहे आह्लादेन हिन्दोलायन्ते, प्रकाशाभिमुखं गच्छन्त्यः वृक्षश्रेण्योऽनागतप्रकाशस्य स्वागतसज्जां कुर्वन्ति । सागरोर्मिमालाः उत्थायोत्थाय भगवतेऽर्घ्यं समर्पयन्ति उपकूलं सङ्घृष्य च भगवच्चरणे विधौते कुर्वन्ति । प्रभातागमने सर्वाणि सुमानि पुष्प्यन्ति । भगवत्सौन्दर्यमभिव्यञ्जयन्ति तानि सर्वभावेन भगवत्समर्पितानि, यतो हि भगवच्चरणारविन्दे स्वात्मसमर्पणमेव तेषां लक्ष्यम् । भगवदभिव्यक्तिरेव तेषामस्तित्वस्यैकमात्रं कारणं ननु । स्पष्टमेव यत् प्रकृतिमाताखिलविश्वं भगवन्निमित्तं यज्ञायाहूय कथयति, "निबिडान्धकारः समाप्तः । हे धरित्रि ! प्रकाशाभिमुखी जागृहि ।" अचिरमेव सूर्योदयेन वसुन्धरारुणरागेण रञ्जिता भवति । तपनोऽभीप्सायाः जागरितमुदाहरणम् । कुसुमेषु स्वर्गोपमाः विमलोज्ज्वलशुभ्रनीहारबिन्दवः मातृप्रार्थनां स्मारयन्ति । "बिन्दुशः स्वीयसर्वशक्तिमयप्रेम्णः प्राणदायिनीमुद्धर्त्रीमग्निशिखां सिञ्चसि त्वम् । यदास्माकमज्ञानान्धकाराच्छन्नजगति इमे शाश्वतज्योतिर्बिन्दवः सुमधुरं पतन्ति तदा प्रतीयते यत् कृष्णव्योम्नः धरित्र्यामेकैकशः हिरण्मयानि नक्षत्राणि वर्षन्ति ।"

व्योम्नः श्वेतकृष्णौ वर्णौ अस्मान् श्रीअरविन्दस्य श्रीमातुश्च दिव्यप्रकाशमण्डलं स्मारयतः । प्रभातागमने प्रकृतिमाता सर्वानाह्वयति कार्याय, यतो हि श्रीमाता कथयति—कार्यं देहस्य परमा प्रार्थना ननु । मध्याह्ने आदित्यस्य प्रचण्डकिरणाः अस्मान् भगवतः प्रखरदिव्यप्रकाशपुञ्जं स्मारयन्ति। प्रदोषकालेऽस्तमयन् दिनकरः विभिन्नवर्णैः स्वमधुररवतरागैः गगनं रञ्जयित्वा सृष्टौ वर्णवैचित्र्यं च निदर्शयति । तत्परमचिरं सुधाकरः स्वकिरणजालैः निबिडान्धकारग्रस्तधरणीं स्वज्योतिषा उद्भासयति, वर्षति च स्वचन्द्रिकां भगवत्कृपारूपेण, सर्वानन्धकारनिमज्जितान् जडजङ्गमान् भगवदभिमुखान् करोति । तारकापुञ्जाः अपि कथयन्ति–'सर्वे भगवतः अंशभूताः स्फुलिङ्गाः ननु ।' सर्वान् च स्वलक्ष्यं स्मारयन्ति ।

सम्पूर्णा सृष्टिः निरन्तरं भगवतोऽद्भुतकथां कीर्तयति । रात्रौ वात्सल्यमयी प्रकृतिमाता विश्वचराचरं स्वक्रोडे स्वापयति गायति च नीरवतायाः परमसङ्गीतम् ।

इत्थं निरन्तरं सृष्ट्याः आदिकालात् प्रभातात् रात्रिपर्यन्तं प्रतिमुहूर्तं सम्पूर्णा विश्वप्रकृतिः भगवद्गाथां निगदन्ती परमकृतज्ञतायां भगवन्मुखी यज्ञं करोति ।

जून १९७४ मासाङ्कादग्रे—

अथ प्रकाशाभ्युदयो नाम

श्री डा० मंगलदेव शास्त्री

एकादश उच्छ्वासः

प्रत्यवमर्शः

१९२४ ई० वर्षादारभ्य १९६८ ई० वर्षपर्यन्तम्, अर्थात् प्रायेण पञ्चचत्वारिंशतं वर्षाणि यावत्, कतिचिद्वर्षाणामवान्तरकालं विहाय, ममासीत् साक्षात्संबन्धः प्रथमं काशिकराजकीयसंस्कृतमहाविद्यालयेन तदनन्तरं तस्यैव रूपान्तरेण वाराणसेयसंस्कृतविश्वविद्यालयेन । सुदीर्घेऽस्मिन् काले तयोः संबन्धेन मम कीदृशं कियद्वा कार्यमिति संक्षेपेण पुरस्ताद् व्याख्यातम् ।

स्पष्टं मम जीवनस्यातिमहान् भागोऽस्मिन् कार्ये व्यतीतः । सततमहोरात्रस्य श्रमेण तत्संपादितम् । एकमात्रं लक्ष्यमासीत्—संस्कृतस्य संस्कृतज्ञानां तद्द्वारा भारतीयसंस्कृतेश्च व्यापकदृष्ट्या विश्वमुखी समुन्नतिः ।

१. **अद्य यावत् पी-एच०डी०उपाध्यर्थं स्वीकृतानां शोधनिबन्धानां विषया एते (१) ब्रह्मसूत्रीय वैष्णवभाष्याणामालोचनापुरःसरं तुलनात्मकमध्ययनम् । (२) पुराणान्तर्गत वैदिक विषयाणामालोचनात्मकमध्ययनम् । (३) विष्णुपुराणान्तर्गतानां धार्मिकसामाजिकैतिहासिक विषयाणामालोचनात्मकमध्ययनम् । (४) शाङ्करवेदान्ते बौद्धदर्शनस्य प्रभावः । (५) महाभारतस्य पुराणानां चाधारेण हिन्दूतीर्थानामालोचनात्मकमध्ययनम् ।**

अद्य यावद् या कापि प्रगतिस्तस्यां दिशि दृष्टिपथमायाति सर्वस्या अपि तस्याः सूत्रपातः सोत्साहमनेनैव जनेन कृत आसीदिति नाविदितं तदितिहासविदाम् ।

तेषु दिनेषु संकीर्णमतीन् प्रगतेर्विरोधिनः प्रति मदीयमुद्बोधनमासीत्—'अद्यत्वे भवद्भिर्यस्याः प्रगतेर्विरोधः 'मया मोहान्धेन प्रहृतमिदमात्मन्यकरुणम्' इत्यनुसारं क्रियते, भविष्ये नूनं स एव प्रगतेः पन्था भवद्भिरप्यनुसर्तव्यः' इति ।

उदाहरणार्थम्, राजनीतिः, आगमशास्त्रम्, जैन बौद्धदर्शने, अर्थानुसन्धानपूर्वकं वेदाध्ययनम्, तुलनात्मकदृष्ट्या दर्शनशास्त्राध्ययनम्, स्त्रीणां कृते विशेषाध्ययनक्रमः, तुलनात्मकं भाषाविज्ञानम्, ऐतिहासिकदृष्ट्या संवलिता भारतीयसंस्कृतिः, प्राचीनाकरग्रन्थानामन्येषां च विलुप्तप्रायाणां विशिष्टग्रन्थानामुद्धारः—इत्यादि विषयेषु प्रथमं तु जनस्यास्य दिग्दर्शनं नैवानुसरणीयमित्येव पक्षः साग्रहं समर्थितस्तैस्तैः संकीर्णमतिभिः कार्यकर्णधारैः !

परं सामयिकीरावश्यकता अनुरुध्य तत्तद्विषयाणां कालक्रमेण क्रियमाणः स्वीकारोऽपि नाद्य यावत्सर्वात्मनोदारदृष्टिमनुसरति !

अत्र विषये ममैतन्निश्चितं मतम्—

अद्यत्वे प्रगत्युन्मुखताया उदारबुद्धेश्च सर्वतः प्रथममपेक्षा संस्कृतज्ञेषु, न केवलं राष्ट्रस्य कल्या-

णार्थमेव, किन्तु तेषामेव सर्वक्षेत्रेषु समुन्नत्यर्थमपि । 'ज्ञानस्य सीमाया बन्धनं ज्ञानस्य विकासश्चेति विप्रतिषिद्धम् !'

'सूर्यप्रकाशावरोधः पादपानामिव, विद्या-प्रकाशावरोधो बुद्धीनां हितावहो न भवति !'

उदारबुद्धेर्व्याख्यानम्

उदारबुद्धेः सर्वतः प्रथममपेक्षा संस्कृतज्ञेष्विति पुरस्तादुक्तम् । तत्र तस्या उदारबुद्धेर्वस्तुतः किं स्वरूपमिति चेच्छ्रूयताम्—

तत्तज्जातिवर्गप्रान्तसंप्रदायादिगतसंकुचितभावनाभ्य उत्थाय राष्ट्रियभावना, अखिल भारतीय भावना, भारतीय संस्कृतेर्भावना इत्याद्युदात्तभावनाभिः संस्कृता परिष्कृता च बुद्धिरेव वस्तुत उदारबुद्धिरित्यभिख्यां भजते ।

उदारबुद्धिश्च पुनः प्रगत्युन्मुखतायामेव पूर्णतः सफलतां समश्नुते ।

तत्रैतौ श्लोकौ भवतः—

सत्यासत्यपरीक्षायां तत्परा आग्रहं विना ।
उदारमतयो नूनं प्रगतेः पक्षपातिनः ।।१।।
पश्चाद्दृष्ट्या प्रवर्तन्ते संकीर्णमतयो नराः ।
रूढिमार्गेण गच्छन्तः प्रगतेस्ते विरोधिनः ।२।

उदात्तवैदिकभावनानां वातावरणे बाल्यादेव लालितः वर्धितश्च, प्राचीनार्षसंस्कृतेरादर्शानिनुसरति गुरुकुले राष्ट्रियभावनाभवने प्रायेण सर्वश्रेष्ठे पाश्चात्य विश्वविद्यालये चान्तेवासित्वगौरवमनुभूयाहं स्वभावादेवोक्तलक्षणाया उदारबुद्धेः पक्षपाती अभवम् । अत एव यत्र कुत्रापि वसन् निश्छद्मभावेन पूर्वोक्तानां राष्ट्रियभावनादीनां संपत्त्यै सततं प्रयत्नपर आसम् ।

तदत्र कतिचिदुदाहरणानामुल्लेख एव पर्याप्तः ।

तथा च, विदेशयात्रायाः पूर्वमेव लाला लाजपतरायादिराष्ट्रनेतॄणां प्रभावेण दलितवर्गस्योद्धारार्थं मया नैकरूपेण प्रयत्नः प्रारभ्यत ।

विदेशप्रवासेऽपि उक्तविषये मम तीव्रा रुचिरन्ववर्त्तत, अत एव तत्र दलितजनताया उद्धारार्थं क्रिश्चियनधर्मानुयायिभिरनुस्रियमाणायाः कार्यपद्धतेरध्ययनार्थं मम विशेषप्रयत्न आसीत् । किं च, विदेशेषु राजामहेन्द्रप्रतापः, मानवेन्द्रनाथरायः, अवनीमुकर्जी इत्यादिभिः प्रसिद्धक्रान्तिकारिभिः स्वसंपर्कस्य स्थापने मम राष्ट्रहितप्रेरणैव एकमात्रं कारणमासीत् ।

स्वदेशे प्रत्यागमनानन्तरं तु सततं राष्ट्रहितभावनया प्रगत्युन्मुखोदारबुद्ध्या च प्रेरितेन मया, प्रतिक्रियावादिनामत्यन्तं घोरविरोधेऽपि, यद्यत्संपादितं संपाद्यते च तत्प्रायेण विवृतं पुरस्तात् ।

किञ्च, राजकीयसंस्कृतमहाविद्यालयस्य प्रधानाचार्यत्वकाले, ततः पूर्वं च, ब्रिटिशशासनस्य क्रोधादिभाजनेभ्यो राष्ट्रियकार्यपरेभ्यश्छात्रेभ्योऽन्येभ्यश्च विविधरूपेण मया प्रदत्तस्य संरक्षणस्य समाश्रयस्य च ये प्रसङ्गास्तेषामत्र वर्णनेनालम् ।

किं बहुना, १९४२वर्षे बिहारप्रान्तीय कारागारादात्मानं गूढोपायेनोन्मोच्य स्वतन्त्रस्य सत इतस्ततो गूढं विचरतः श्री जयप्रकाशनारायणस्यापि दिनद्वयमस्मत्कुटुम्बेन सह निवासः, एतादृशा एवान्येऽपि प्रसङ्गाः—सर्वमेतदेकान्तभावेन ममोक्तप्रवृत्तीनां पक्षपातमेव द्योतयति ।

राजकीयसंस्कृतमहाविद्यालये छात्राणां प्रवेशे जन्मजातिगतभावना संकीर्णसांप्रदायिकभावना वा बाधिका न भवेत्, केवलं योग्यतायाः प्रश्न एव

विचारणीयो भवेदित्येतदर्थं मया सततं प्रयतितम् । अन्ततो गत्वा द्वौ शासनादेशावपि(g. o no. A-4o17/xv-91o-47, dated May 12, 1947 तथा G." O." no. O-1422/II-B-55-1948, daned April 14, 1948) **उक्तार्थपुष्टिकरौ प्राप्तौ आस्ताम् । तदनुसारमुक्तमहाविद्यालये प्रवेशावसरे, न केवलं छात्राणां जन्मजातेः प्रश्न एव नोत्थापनीय इत्यादिष्टमासीत्, किन्तु प्रवेशपुस्तके कस्यापिच्छात्रस्य जातेरुल्लेखोऽपि न करणीय इत्यप्यादिष्टमासीत् ।**

एतादृशैरेव विचारैः प्रेरितेन मया तत्तज्जातिविचारमुपेक्ष्यैव केवलं योग्यताया आधारेणैवच्छात्राणां प्रवेशः प्रचालितोऽभूत् । तत्कारणादेव स्वामिरामानन्द (हरिजनजातीयः सः) शास्त्री (अद्यत्वे संसत्सदस्यः) स्वामि सर्वानन्द शास्त्री (हरिजनजातीयः), अन्येऽपि च तत्सदृशाः अस्माकं महाविद्यालयस्य स्नातका दृष्टिपथमायान्ति ।

तदेतन्नूनं मम सात्त्विकगर्वस्य प्रसन्नतायाश्च विषयः !

एवमेव महाविद्यालयीयच्छात्रेषु विशेषतः, संस्कृतजगति च सामान्यतः, परम्परागतसंकीर्णबुद्धेरुन्मूलनार्थं प्रगतिभावनायाश्च विकासार्थं मम नैके प्रयत्ना आसन् । अलमत्र तेषां परिगणनया ।

तेषामेवैष सुपरिणामो यदस्माकं नैके प्राचीनच्छात्रा अनुसन्धानोपाधिभिर्युक्ता अथच वैदेशिकविश्वविद्यालयीयशिक्षादीक्षिता दृष्टिपथमागच्छन्ति ।

तत्र खेदावहोऽन्तरायः

परमत्यन्तखेदस्यायं विषयो यदुक्त महाविद्यालयाद्मयावकाशग्रहणानन्तरं यैर्महोदयैः प्रधानाचार्यकार्यभारो गृहीतः प्रायेण ते तत्तत्क्षेत्रे प्रगतिभावनाया उन्मूलनार्थं कृतसंकल्पा इवासन् ।

भारतवर्षेण नूनं स्वराज्यं लब्धम् । परं राजकीयसंस्कृतमहाविद्यालये तत्तज्जातिवर्गसंप्रदायगताः संकीर्णभावना अहमहमिकया भूयोऽपि लब्धप्रसरा आसन् । छात्राणां प्रवेशे उदारताया भावना तावद्दूर आस्ताम्, अध्यापकानामपि नियुक्तौ चिरपरम्परया प्राप्तोदारभावना प्रायेणास्तंगता ।

संकीर्णभावनामूलाया अस्या दुष्प्रवृत्तेः प्रभावः स्वभावतो वाराणसेयसंस्कृतविश्वविद्यालयमपि ग्रस्तवान् । सत्यमेतत् 'कार्यं निदानाद्धि गुणानधीते' इति । स च प्रभावो भूतावेशइव तं विश्वविद्यालयमद्यापि न मुञ्चति । एतत्कारणादेव तत्रत्योपकुलपतिकृतेआरमरक्षार्थम् , आरक्षकबलस्य (of the Police Force) **आवश्यकता प्रायेण जायते । उच्चपदस्थाधिकारिणामपि न केवलं प्रतिष्ठाभङ्गस्य, किन्तु प्राणरक्षाया अपि, गम्भीरप्रश्नो यदा कदा समुत्पद्यते ।**

तदस्या विश्वविद्यालयीय दुःस्थितेः किं मौलिकं कारणमिति जिज्ञासायाः समाधानं तु विश्वविद्यालयस्य प्रारम्भकाल एवोच्चशिक्षाधिकारिणां संकुचितमनोवृत्तेरनु संधान एव निहितमित्यन्यत्र विस्तरः !

शास्त्रेषु 'विद्या ह वै ब्राह्मणमाजगाम गोपायमा शेवधिष्टेऽहमस्मि ।' (निरुक्ते २।४), 'एतस्मिन्नार्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद् विद्यायाः पारगास्तत्रभवन्तः शिष्टाः' (व्याकरणमहाभाष्ये ६।३।१०९) इत्यादिप्रकारेण येषामध्यापकानां महिमा शतशो गीयते, यादृशां हि महात्मनां दर्शनं भारते प्रायेण पूर्वं सुलभमासीत्,

साम्प्रतमपि च दिष्ट्या बहवस्तादृशाः (=तपः-स्वाध्यायनिरताः शान्तादान्ता मनीषिणः) वाराणसीमलंकुर्वन्ति (तदत्रास्मिन्नेव ग्रन्थे द्वितीयउच्छ्वासेऽद्यत्वेऽपि संस्कृतविद्वत्सूपलभ्यमानानां विशिष्टगुणानां वर्णनं द्रष्टव्यम्), तेष्वेवाद्यत्वे भारतस्य दौर्भाग्येण कश्चिन्नूतन एव प्रकारोऽपि दृष्टिपथमागच्छन् सखेदं सर्वानाश्चर्यचकितान् विदधाति !

तस्मिन् प्रकारे हि—

कर्तव्यभावनाह्रासो मायाचारप्रवीणता ।
कूटकापट्यवृत्तिश्च कस्य दुःखाय नो भवेत् ! ॥१॥

तदेतदतीव खेदावहं भारतीयसंस्कृतेर्गीर्वाणवाण्या वा उद्धारायकृतसंकल्पानाम् ।

एतादृशे प्राणशोषणवातावरणे विश्वविद्यालये 'असतो मा सद्गमय, तमसो मा ज्योतिर्गमय' (बृहदारण्यकोपनिषदि १।३।२८), 'अश्रद्धामनृतेऽदधाच्छ्रद्धां सत्ये प्रजापतिः' (यजुर्वेद १९।७७) इत्यादि श्रुतिप्रतिपादितस्य सत्यानुसंधानस्य वा विद्यायाः समुन्नतेश्च वानुकूलोऽवसर उपस्थितो भवितुमर्हतीत्येव तावदसंभवं प्रतीयते ।

अत एव तत्रत्येनोपकुलपतिना २०।८।१९६७ ई० दिनाङ्के कार्यकारिण्यां परिषदि **"अनुसन्धानकार्ये विशिष्टविद्वत्तापूर्णप्रकाशनकार्ये वा लब्धप्रतिष्ठा योग्या एव विद्वांसो व्याख्यातृपदेषु प्राध्यापकपदेषु च विश्वविद्यालये नियोज्याः' इत्यर्थको मदीयः प्रस्तावः साग्रहं प्रस्तुतोऽपि पूर्णतयोपेक्षित एव ।**

विश्वविद्यालयस्य प्रारम्भकालादेव प्राध्यापकानां नियुक्तावस्था दृष्टेरुपेक्षा तद्भविष्यमन्धकारमयं कृतवती ! तत्रत्याः केचित् प्राध्यापका अद्य यावत्कथमनुसन्धानकार्यस्य मार्गप्रदर्शनं कृतवन्तः कुर्वन्ति वा? तदेतच्चिन्तयत एव रोमाञ्चो जायते ! तदेतत्तावदेकं मुख्यं तत्रत्यवैचित्र्यस्य निदर्शनम् !

अन्यच्च रहस्यात्मकं निदर्शनम्

अत्र स्मृतिपथमायात्यपरं रहस्यात्मकं निदर्शनम् । सामयिकमिति नात्र तदुल्लेखनमसाम्प्रतम् ।

१९६६ वर्षे **ताशकन्दगमनस्य** किञ्चित्कालात्प्राग् देहलीराजधान्यां प्रधानमन्त्रिभिः स्व० श्री लालबहादुरशास्त्रिभिर्मया साक्षात्कारो जातः । काशीविद्यापीठे स्थितिकाले स मम शिष्य आसीदिति पूर्वमवोचाम । अस्माकं राजकीय संस्कृत महाविद्यालयीय प्रथमदीक्षान्तमहोत्सवेऽपि स निमन्त्रणेनोपस्थित आसीत् । मम प्रधानाचार्यत्वेन नियुक्तेरवसरे जातेन महता संघर्षेणापि सपरिचित आसीत्। प्रधानाचार्यत्वेन मम नियुक्तेरनन्तरं या अभूतपूर्वा प्रगतिर्महाविद्यालयस्याजायत, सापि नूनं तस्य श्रुतिपथमागताभूत् ।

१९६४ वर्षे (२६।१२।१९६४ दिनाङ्के) स्वकीय प्रधानमन्त्रित्वकाले वाराणसेय संस्कृतविश्वविद्यालयस्य दीक्षान्तभाषणप्रदानाय स आमन्त्रितोऽभूत् । तस्य भाषणस्य स्मृतिर्नवीनैवासीत् तस्य मानसे । तद् भाषणं विश्वविद्यालयात् प्रेषितसूचनाया अनुसारेणैव लिखितं मुद्रितं चासीत् ।

तस्मिन् भाषणे **डा० जे० म्यौर, डा० जे० आर० बैलेन्टाइन, डा० जी० थीबो, श्री आर० टी० एच० ग्रिफिथ**प्रभृतिपाश्चात्यानामपि प्रधानाचार्याणां नाम्नामुल्लेखे सत्यपि मदीयनाम्न उल्लेखाभावेन स खिन्नइव मां प्रति किञ्चिदाश्चर्यं प्रकटीकृतवान् ।

मया तु सस्मितं केवलमेतावदेवोक्तम्—**नैवात्र किञ्चिदाश्चर्यम्। एष खलु तत्रत्यः 'शीलसमुदाचारः'** !

शतशः शासनीयपत्रादिषु संस्कृतमहाविद्यालयीयविशिष्टप्रगतिसम्बन्धे मम नाम्न उल्लेखे सत्यपि वाराणसेय संस्कृतविश्वविद्यालयेन संबद्धानां **केषांचिद्** 'महानुभावानाम् एष' एव प्रयत्नो दृश्यते यत्तस्य विद्यालयस्य विश्वविद्यालयस्य वा इतिहासान्मम नामोल्लेखोऽपि विलुप्येत इति। अत्र विषये निदर्शनानां बाहुल्यमिति नाविदितं विपश्चिताम्। तदेतदतीव मे मनोरञ्जनस्य विषयः!

एतादृशस्थलेषु स्वकीय आदर्शस्तु एवं प्रतिपादितोऽस्माभिरेवान्यत्र—

'कृतघ्नतापिशाच्या वा मित्रद्रोहस्य रक्षसः।
स्वार्थस्य दुष्टवृत्तेर्वा घतित्राणाय यन्मतम्॥
चित्तस्य तादृशं स्वास्थ्यं सोऽयं मे निचिरव्ययः।'
(जीवनज्योतिः ११।४२, ४६)

मम जीवनस्य भविष्यकार्यक्रमः

तदेवं संस्कृतविश्वविद्यालये तत्प्रगतेर्वर्तमानस्य स्वरूपस्य प्रवृत्तीनां च दृष्ट्या तद्विषयकस्वजीवनस्वप्नानां पूर्णरूपेण साफल्यमदृष्ट्वापि नैवाहं भग्नमनोरथो भवामि। नूनं स समय आगमिष्यति यदा स विश्वविद्यालयः सगर्वं सोल्लासं च मत्प्रदर्शितमार्गेणैव क्रमशो विकासमेष्यति। नूनं 'नान्यः पन्था विद्यतेऽयनाय'

स्वजीवनस्य भविष्यकार्यक्रमसंबन्धे तु नास्ति मम किञ्चिन्नूतनं वक्तव्यम्।

२५।७।१९६१ दिनांके स्वकीयोपकुलपतित्वकाले संस्कृतविश्वविद्यालयीय सत्रारम्भभाषणे[1] मया स्पष्टमुक्तमासीत्—उपकुलपतित्वं मया स्वीकृतं केवलं विश्वविद्यालयस्य, **स्वाभिमतादर्शानां दृष्ट्या**, हितकरणार्थम्। यदि तत्र बाधोपतिष्ठते, तर्हि विद्यते ममान्यो निरत्ययो मार्गः कार्यस्य। **स च भारतीय संस्कृतेर्विकासस्य सप्तसु अष्टसु वा खण्डेषु धारारूपेण व्याख्यानरूपः**। उपकुलपतिपदान्निरतिशयेनात्यधिकं महत्त्वं तस्य कार्यस्य। अवश्यं चिरचिरकालस्थायि तद् भविष्यति! इति।

स एवाद्यत्वे मम जीवनस्य मुख्यो भविष्यकार्यक्रमः। 'यद् भूतं यच्च भाव्यम्' सर्वं तद्विस्मृत्य साम्प्रतं तावदेकान्तभावेन, स्थविरतानुषङ्गिणि शरीरास्वास्थ्ये सत्यपि, प्रधानतस्तदनुसन्धानकार्यमेव कर्तुमभिलषामि।

स्वजीवनस्यादर्शानां विषये यत्प्रधानतो वक्तव्यं तत् खलु अस्यात्मवृत्तान्तीय प्रकरणस्य प्रारम्भ एव स्पष्टरूपेणोक्तम्।

साम्प्रतमेव प्रकाशितः 'असाम्प्रदायिक दृष्ट्या विश्वमानवीय दृष्ट्या च जीवनदर्शनस्य प्रतिपादकः' 'जीवनज्योतिः' अथवा 'वैदिक गीताञ्जलिः' इत्याख्यो ग्रन्थ एकप्रकारेण मम जीवनप्रगतेरेव जीवनादर्शानां वा व्याख्यारूप इति पूर्वमवोचाम।

नैव तत्प्रतिपादनं पुनरुक्तिमपेक्षते। तथापि ततः कश्चिदंशोऽत्र समुद्ध्रियते, **यो वै मम जीवनयात्रायाः प्रकाशस्तम्भरूपः**—

(क्रमशः)

१—अस्मिन्नेव ग्रन्थे इतः पूर्वं तत्प्रकाशितं विद्यते।

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनु० श्री जगन्नाथो वेदालंकारः

**स नः पावक दीदिवोऽग्ने देवां इहा वह ।
उप यज्ञं हविश्च नः ॥१०॥**

१ सः २ नः ३ पावक ४ दीदि-वः ५ अग्ने ६ देवान् ७ इह ८ आ ९ वह १० उप ११ यज्ञम् १२ हविः १३ च १४ नः ।

4 O Shining 5 flame 1,3 thou who purifiest 7 hither 8,9 bear (2 for us) 6 the Gods 10 to 14 our 12 offerings 13 and 10 to 14 our 11 sacrifice.

३ हे परिशोधक ! ४ महातेजोमय ५ अग्ने! १ पूर्वकीर्तितः प्रसिद्धस्त्वम् २ अस्मभ्यम् ७ अत्र अन्तर्यजनवेदौ १४ अस्माकम् ११ अन्तर्यागम् १२ पूर्वोक्तहव्यसमूहम् १३ च प्रति, तयोः १० समीपे, ६ देवान् ८,९ प्रापय ।

भावार्थः

हे देदीप्यमान अग्ने, हे परमपावक, इह अस्माकं यज्ञं हव्यं च प्रति देवानाहर ।

व्याकरणम्

४ दीदि-वः । द्र. १ १२.५[2] ।

**स नः स्तवान आ भर गायत्रेण नवीयसा ।
रयिं वीरवतीमिषम् ॥११॥**

१ सः २ नः ३ स्तवानः ४ आ ५ भर ६ गायत्रेण ७ नवीयसा ८ रयिम् ९ वीर-वतीम् १० इषम् ॥

1 Thou 3 adored 7 by our fresh 6 Gayatri rhythms 4.5 bring 2 for us 8 the felicity and 10 force 9 full of hero's strength.

७ नवतरेण ६ गायत्रीछन्दोबद्धस्तोत्रेण ३ स्तूयमानः १ पूर्वमभिगीतः त्वम् २ अस्मभ्यम् ८ आनन्दनिधिं ९ वीरत्वपरिपूर्णां, शौर्यवीर्योपेतां १० प्रेरयित्रीं शक्तिं च ४,५ आहर ।

भावार्थः

हे अग्ने ! अस्माकं नव्यतरेण गायत्रस्तोत्रेण संस्तुतस्त्वमस्मभ्यमानन्दैश्वर्यं पराक्रमशालिनीं शक्तिं चाहर ।

व्याकरणम्

३ स्तवानः । ष्टुञ् स्तुतौ इत्यस्मात् कर्मणि लटः शानचि छान्दसं रूपम् ।

५ भर । हृ धातो र्लोण्मध्यमैकवचनम् । हृस्य भश्छान्दसः ।

६ गायत्रेण । गायत्र्या इदं गायत्रं तेन ।

९ वीर-वतीम् । वीरशब्देन वीरत्वं लक्ष्यते । वीरः अर्थात् वीरत्वं वीर्यं वाऽस्यामस्तीति ताम् ।

१० इषम् । एषणं गतिः प्रेरणं वा । तदेव इट् । इष गतौ इत्यस्माद् दैवादिकात् स्त्रियां भावे क्विप् । तदन्तात् 'इष्' शब्दात् द्वितीयैकवचनम् । अन्तरर्थेऽयं शब्दः प्रेरणबलस्य प्रकाशशक्तेर्वा वाचकः ।

**अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः ।
इमं स्तोमं जुषस्व नः ॥१२॥**

१अग्ने २शुक्रेण ३ शोचिषा ४विश्वाभिः ५ देवहूति-भिः ६ इमम् ७ स्तोमम् ८ जुषस्व ९ नः ॥

1 O fire 3 with thy lustres 2 white and 4 all 5 thy divine hymns that summon the Gods 8 come and accept 6 this 7 hymn 9 that we affirm.

१ हे तपोदेव अग्ने ! स्वात्मनः २ शुभ्र-श्वेतेन तेजसा, ३ स्वीयशुभ्रप्रभाभिः स्वकीयैः ४ सर्वैरपि ५ देवाह्वायकैः दिव्यसूक्तैश्च युक्तस्त्वं तैः सहात्रागत्य ९ अस्माकम् ६ इदं स्तोत्रं ८ प्रीत्या सेवस्व ।

भावार्थः

हे अग्ने ! निजसमुज्ज्वलज्योतिःप्रभाभिः देवाह्वानकरीभिर्दिव्यस्तुतिभिश्च सह त्वमत्र समेहि, स्वीकुरु चास्माकमिदमस्माभिर्गीयमानं स्तोत्रम् ।

व्याकरणम्

५ देवहूति-भिः । देवानां हूतयः आह्वानानि यासु स्तुतिषु ताभिः ।

(क्रमशः)

गुरुकुल पत्रिका के नियम

१ 'गुरुकुल पत्रिका' मासिक है । यह प्रत्येक अंग्रेजी मास की १२, १३ तारीख को प्रकाशित होती है ।

२ यह आधी संस्कृत में तथा आधी हिन्दी में होती है । इस में कवर समेत प्रायः ४४ पृष्ठ होते हैं । वर्ष में एक या दो विशेषांक लगभग १२०-१५० पृष्ठों तक के होते हैं ।

३ इसमें प्रमुख रूप से लेख वैदिक-साहित्य, भारतीय-संस्कृति-सम्बन्धी होते हैं ।

४ वार्षिक मूल्य देश में ४) और विदेश में ७) है, जो धनादेश (मनीआर्डर) द्वारा ही "**सम्पादक : गुरुकुल-पत्रिका**" के नाम से आना चाहिए । ग्राहक कभी भी बन सकते हैं ।

५ लेख छोटे, सारगर्भित तथा मौलिक होने चाहिएं । शुद्ध, सुपाठ्य तथा एक ओर लिखे होने चाहिएं । लेख, कविता तथा समालोचनार्थ पुस्तकें (२ प्रतियां), परिवर्तनार्थ पत्र-पत्रिकाएं सम्पादक के नाम भेजनी चाहियें ।

६ किसी लेख अथवा कविता आदि के प्रकाशित करने या न करने, घटाने-बढ़ाने या संशोधन करने का अधिकार सम्पादक को है । बिना डाक खर्च भेजे अप्रकाशित कविता वा लेख लौटाये न जा सकेंगे ।

सम्पादक—गुरुकुल पत्रिका, डाकघर : गुरुकुल कांगड़ी

जिला : सहारनपुर (उ० प्र०)

जुलाईमासाङ्कादग्रे--

ध्वनितत्त्वम्

डा० रामनारायणदासः

तत्र वीरो नाम विविधमीरयति विश्ववैचित्र्यमिति भगवान् शब्दराशिरिति भट्टारकः । तदुक्तं चिद्गगनचन्द्रिकायाम्--

ईरणेन विविधेन वीरतां यो यदक्षरयणः प्रपद्यते । वीरसम्बन्धी धर्मो वीर्यमित्युच्यते । मन्त्राणां वीर्यमिति मन्त्रवीर्यम् । तच्च वीर्यं पूर्णाहङ्कार एव । यदि त्वमात्मानं देहमात्रं मन्यसे, तर्हि तव देहाधिकृतं यावद् विद्यते, तावदेव अधिकर्तुं समर्थः । तदधिकं चेद् वाञ्छसि तर्हि दण्डभीतिः । तदुक्तं भट्टगङ्गाधरमित्रैः--

अपूर्णम्मन्यता व्याधिः कार्पण्यैकनिदानभूः ।
क्लेशावहो जुगुप्सश्च सर्वधर्मबहिष्कृतः ।।
आनन्दकणभिक्षार्थं शब्दस्पर्शादिपक्वणे ।
अटत्यविरतं येन तद्दारिद्र्यं विदुर्बुधाः ।।

यदि च त्वम् अकारहकारप्रत्याहारात्मा गर्भीकृताशेषविश्वसमग्रशास्त्रप्रसरप्रथमाङ्कुरः चित्स्वरूपः पूर्णाहन्तारूपो यो भगवान् शब्दराशिः तदात्मना स्वात्मानं परामृशसि तर्हि यावद्तद् अधिकृतम्, तावद् अनुशास्तुं समर्थः । चित्स्वरूपस्य अहमित्यस्य मन्त्रवीर्यत्वमुक्तं श्रीसंवित्स्तोत्रे--

आदिमान्तगृहीतवर्णाराश्यात्मिकाहमिति या स्वतः प्रथा ।
मन्त्रवीर्यमिति साधितागमैस्तन्मयो गुरुरसि त्वमम्बिके ।।

अस्येदं तात्पर्यम्--प्रकाशविमर्शात्मका अकारहकारौ मध्यवर्तिनां लौकिकवर्णमालाघटकानां समेषां वर्णानां बोधकौ अथ च स्वात्मनोरपि । यथा पाणिनीयशास्त्रे 'आदिरन्त्येन सहेता' इति सूत्रेण निष्पन्ना अणादिप्रत्याहाराः अकारादिध्वनीनामथ च मध्यपतितवर्णानां बोधकास्तथा अत्रापि ब्रह्मनिष्ठस्पन्दभूतौ अकारहकारावपि । भेदस्तावद् उभयत्र अयमस्ति यत्पाणिनीयव्याकरणशास्त्रे अणादिसंज्ञाभिः, अन्त्यस्य णकारादे ग्रंहणं न क्रियते, इत्संज्ञकत्वात् । किन्त्वहमिति इत्यत्र हकारोऽपि 'अह' इति प्रत्याहारेण गृह्यते । ब्रह्मनिष्ठप्रकाशविमर्शयोः समरसीभूते 'अहम्' इत्यत्र प्रत्याहृताः स्वरव्यञ्जनात्मकाः सर्वे ध्वनयो भगवतः शक्तिस्वरूपाः ।

परमात्मनि अकारककारादि स्वरव्यञ्जनवाच्यानामशेषशक्तीनामभेदरूपतया समन्वयो विद्यते । अत एव निष्कले ब्रह्मणि पूर्णाहन्ता स्वाभाविको धर्मः । निखिलं स्वरव्यञ्जनात्मकं सार्थकं निरर्थकञ्च ध्वनिम्, अथ च निखिलं विश्वं मयूराण्डरसे पुच्छपादाङ्गानीव यद्वा वटबीजे शाखापल्लवादीनि इव अभेदरूपतया गर्भीकृत्य परात्मनि परावागात्मकं चित्स्वरूपं 'अहम्' इति स्फुरति । उक्तञ्च योगिनी हृदयस्य मन्त्र सङ्केत निरूपणे--

अतोऽकारहकाराभ्यामहमित्यपृथक्तया ।
प्रपञ्च शिवशक्तिभ्यां क्रोडीकृत्य प्रकाशते[1] ।।

परावागात्मकमिदं स्फुरणं '**स्वरूपज्योतिरेवान्तः परावागनपायिनी**' इत्युक्त्या स्वतः प्रकाशस्वरूपा । पश्यन्त्यादिकं वैखरीपर्यन्तञ्च उत्तरोत्तरं क्रमशः प्रकाशयति । विमर्शस्वभावा विगलितोपरागा निरोधकाभावाद् अनिशं स्फुरद् रूपतया च स्वरसवाहिनीयमहन्ता चेतनाचेतनात्मकस्य जगतः, देशकालादिभेदकानाञ्च स्वात्मन्यसम्भवाद् अद्वितीयः सन् आगमेषु अहमित्यभिहितः । स एव

---

१ नियत्यषोडशिका पट १२ श्लोक ४४तमस्य शिवानन्दकृत ऋजुविमर्शिनी व्याख्यायामयं श्लोकः समुद्धृतः ।

अनाहत महाध्वनिभट्टारकः। नित्यं स्फुरद्रूपतया तद्विशिष्टतया च परब्रह्मापि तद्रूपमेवेति परावागात्मिका पूर्णाहन्ता च तदभिन्ना।

एतत्सर्वम् अद्वैतवादिनां मतानुसारेण ध्वनितत्त्वं व्याख्यातम्। द्वैतवादिनां मतानुसारेण तु परावागात्मनो ध्वनेः विन्दोः समभिव्यक्तिः। यथा बौद्धमतानुयायिनो **'बुद्धो धर्मः संघश्च'** इति रत्नत्रयमङ्गीकुर्वन्ति, एवं भेदवादिनस्तान्त्रिका अपि शिवः शक्तिः बिन्दुः इति रत्नत्रयं मन्यन्ते। शिवः पुरुषनाम्ना अथ च शक्तिर्मायानाम्नाऽप्यभिधीयते। शक्तेश्चापरं नाम 'एकोऽहं बहु स्याम्' इत्येवं रूपा इच्छा। बिन्दुश्च त्रिगुणात्मिका प्रकृतिरुच्यते। अयञ्च बिन्दु नादबीजभेदेन त्रिधा भिद्यते। उक्तञ्च—

कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा।
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते।
स बिन्दुबीजनादभेदेन च निगद्यते॥

—प्रपञ्चसार० तं० पट० १२, श्लो० ४३।

गुणत्रयात्मकाद् यो बिन्दुः समुत्पद्यते स स्थूलः, तन्मूलभूतश्च यः विन्दुः स सूक्ष्मः, क्षुभ्यमाणात् सूक्ष्मविन्दोः चेतनमिश्रो नादः समुत्पद्यते। उक्तञ्च—

विन्दोस्तस्माद् भिद्यमानाद् रवो व्यक्तात्मको भवत्।[1] स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते।

बिन्दुसमुद्भूतश्चायं नाद एव परावाङ्नाम्ना व्यपदिश्यते। परादिवाचां स्वरूपविषये द्वैताद्वैतिनोरुभयोर्मते साम्यमपि विद्यते। परावाक् चेतनमिश्रा भुवनादिसृष्टिसमर्था च। विन्दोः संक्षोभात् समुद्भूतो योऽव्यक्तात्मको रवः, स एव नाभिहृदयादिदेशं क्रमशः उत्तरोत्तरं प्राप्य पश्यन्त्यादिरूपम् उपाधिमाश्रयति। विन्दोः शब्दात्मिका वृत्तिरेव परादिभेदेन चतुर्धारूपं भवति। सर्वप्राणिषु च आसां परादिवाचां सत्ता स्वीक्रियते। पुण्यापुण्यादिकर्मोपाध्यवच्छिन्नत्वात् प्राणिषु न्यूनाधिक्येन परादिवृत्तीनामुदयो दृश्यते परादिवृत्तीनां विषमरूपेण प्राणिषूदयात् कस्यचिज्ज्ञानमुत्कृष्टम्, कस्यचिच्च मध्यमं अपकृष्टं वा दृश्यते। परादिवाचाम् अतिक्रमणे सत्येव शिवत्वलाभो मोक्षः सम्प्राप्यते।

तदेव विन्दुः संक्षुब्धः सन् यथा इन्द्रियभोगभुवनादीनि सृजति, तथैव परादिध्वनिमपि। द्वैतमते परावाग्रूपो ध्वनिः विन्दोर्वृत्तिविशेषभूतः। अस्यातिक्रमणे सति मोक्षलाभः। यद्यपि त्रिगुणात्मकः सूक्ष्मो बिन्दुः विशुद्धः सत्त्वगुणस्याधिक्यात् अद्वैतवादिनां मते तु परावाग्रूपो ध्वनिः, ब्रह्मणः स्वतन्त्राचिन्मयी शक्तिः। चित्तस्वरूपा इयञ्च वाक् पूर्वोक्तपूर्णाहन्तात्मना परमात्मन्यभेदेन विराजते। नित्यमभेदसम्बन्धस्य सत्त्वाच्च परब्रह्मापि तन्मयम्।

अत्र युक्तायुक्तत्वविचारः—

वस्तुतस्तु महाविन्दोरूर्ध्वं चित्कला यद्वा चिच्छक्तिः स्वच्छन्दतया परिक्रीडति। क्रीडेयं परायावाचो यद्वा परमात्मनो विलासरूपा। सा च परावाक् चिन्तनशून्या आत्माश्रिता अनपायिनी च। विशेषोपायैर्यदा मनः निःसङ्कल्पम् तदा चिदात्मरूपया परया वाचा सह तस्यानवरतरूपेण सम्बन्धः अखण्डानन्दश्चानुभूयेते। परमात्मनि गर्भीकृताशेषविश्वं चिन्मयम् अहमात्मकं यत्स्फुरणम्, तदेव प्रथमो ध्वनिः, स एव ध्वनिः परावाङ्नाम्ना आम्नातः। महाविन्दोः परायाः वाचः जनित्वमसङ्गतं प्रतिभाति। कस्यचिदपि स्पन्द-

---

१ योगिनीहृदयदीपिकायां मन्त्रसङ्केतनिरूपणे २१-२२तमेषु श्लोकेषु दीपिकासेतुबन्धाख्यटीकायामयं श्लोकः मानिनीशास्त्रसिद्धान्ततन्त्रात् समुद्धृतः।

नस्य यद्वा समुत्पत्तेर्ध्वनिशून्यत्वाभावात् । ब्रह्मणि 'एकोऽहं बहु स्याम्' इत्येवं स्पन्दनं यदा समभवत् तदव्यवहितक्षण एव ध्वनिरभूत् । किञ्च वैयाकरणलघुसिद्धान्तमञ्जूषायां शक्त्याश्रयनिरूपणावसरे यो नादाभिव्यक्तिक्रमो दृश्यते स अविचारितरमणीयः, मञ्जूषोक्तक्रमोऽधस्तात् समुद्धृतः--

ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः । ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो बिन्दुरूपम् अव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य विन्दोरचिदंशो बीजम् । चिदचितमिश्रोंऽशो नादः । चिदंशो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्या उच्यते ।

अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानसृष्ट्युवयोग्यावस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव रव पराआदिशब्दैर्व्यवह्रियते । इति प्रोक्तम् ।

"अबुद्धिपूर्विका" इति नागेशोक्तघटकस्य अबुद्धिपदस्य 'परमेश्वरस्य स्वभावः लीलाच' इति पर्यायौ । स्वभावः कीदृग् इति चेत् बहुत्वभवनरूपः परिस्पन्दः । यद्वा रन्तुमिच्छारूपः तदुक्तं काशीखण्डे--

यदेकलो न शक्नोसि रन्तुं स्वैरञ्चरप्रभो ।
तदिच्छा तव योत्पन्ना सैषा शक्तिरभूत्तव ।।

अस्माद्विन्दोः शब्दब्रह्मापरनामधेयम् इति पूर्वोद्धृतनागेशवाक्ये 'अस्माद्विन्दोः' इत्यनेन त्रिगुणात्मकविन्दोर्ग्रहणम्, न तु त्रिदंशो विन्दुरित्यस्य । अत्र प्रक्रियायां पूर्वं रन्तुमिच्छा ततस्त्रिगुणात्मको बिन्दुः, ततश्चेतनमिश्रो नादः, इत्येवं क्रमः । रन्तुमिच्छारूपं परिस्पन्दजन्यत्रिगुणात्मकविन्दोरभिव्यक्त्युत्तरं नादः, समजनि । परायावाचः स्वरूपविषयेऽयमेव नागेशस्य सिद्धान्तः। परन्तु परायाः वाचोऽयं क्रमो विश्वासं न समारोहति । ब्रह्मणि एकोऽहं वहुस्याम्, इत्येवं यदा परिस्पन्दः समभूत् तदव्यवहितोत्तरमेव ध्वनिरभिव्यक्तः । कस्यचिदपि परिस्पन्दस्य ध्वनिशून्यत्वाभावात् । यद्वा कस्यचिदपि ध्वनेः स्पन्दशून्यत्वाभावात् । अतएव स्पन्दध्वनयोः अपृथकत्वमामनन्ति मनीषिणः। अतएव स्पन्दप्रदीपिकायां स्पन्दः सविन्मूलं ध्वनिरूपमिति बहुशो व्याख्यातः । किञ्च उभयोः साहचर्याद् ध्वनिरेव स्पन्दः, स्पन्द एव ध्वनिः इत्यपि व्यवहर्तुं शक्यते । तस्माद् ब्रह्मणि स्पन्दनस्य यद्वा सम्विद्शक्तेः त्रिकालाबाध्यत्वात् परायावाचश्च सम्वित्स्वरूपत्वात् शक्तिशक्तिमतोरभेदाच्च ब्रह्मणा सह तस्याः अद्वैतमेव समायातीति शम् ।

'उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः'

कार्य परिश्रम से सफल होते हैं, केवल चाहने से नहीं । अतः सब पुरुषों को पुरुषार्थ करना चाहिये ।

वैदिकसाहित्यसौदामिनी

श्री वागीश्वरो विद्यालंकारः, साहित्याचार्यः

पञ्चम उन्मेषः

तत्र ध्वनिविमर्शः

चतुर्थोन्मेषे साङ्गोपाङ्गा व्यञ्जना निरूपिता। अथ व्यञ्जनालभ्यस्य अर्थस्य वाच्याऽर्थातिशायित्वे तस्य ध्वनित्वम् उत्तमकाव्यत्वं च प्राचीनाचार्यैः श्रीमदानन्दवर्धनप्रभृतिभिर्यत् प्रतिपादितं तत् तेषु बहुमानात् प्राप्तावसरं प्रस्तूयते--

प्राचीनाः प्राहुराचार्या आनन्दवर्धनादयः,
ध्वनिं नामोत्तमं काव्यं व्यङ्ग्ये वाच्यातिशायिनि॥१
अतादृशे पुनर्व्यङ्ग्ये तुल्ये हीनादिकेऽथवा,
मध्यमं तु गुणीभूतव्यङ्ग्याख्यं संप्रचक्षते ॥२

इह प्रथमं ध्वनेरेव प्रासङ्गिकत्वाद् गुणीभूतव्यङ्ग्याख्यं मध्यमं काव्यं केवलनामतो निर्दिश्य प्रकृतमनुसरामः। ध्वन्यतेऽस्मिन्निति ध्वनिनामकम् उत्तमं काव्यम्। ध्वन्यते इति ध्वनिर्वस्त्वलङ्कार-रसादिरूपोऽर्थः। ध्वनतीति ध्वनिः शब्दोऽर्थो वा। ध्वननं ध्वनिः शब्दादेर्व्यापारविशेषः। एवं ध्वनिपदं प्रकरणानुसारमनेकार्थकम्।

अभिधा लक्षणा मूलतयाऽऽदौ द्विविधो ध्वनिः।
विवक्षितेऽपि वाच्येऽर्थेऽन्यनिष्ठे सोऽभिधोत्थितः॥३

अभिधामूलो लक्षणामूलश्चेति ध्वनिः प्रथमं द्विविधः। अभिधामूलध्वनौ वाच्यार्थो विवक्षितोऽप्यन्यपरको यतः स प्रधानप्रतिपाद्यस्य व्यङ्ग्यार्थस्य रसभावादेर्वा प्रतीतौ अङ्गतां गच्छति। ध्वनेर्द्वितीयो भेदो लक्षणामूलो यत्र लक्षणामूलत्वादेव बाधितस्य वाच्यार्थस्य न विवक्षा तादूप्येण वोपयोगः। अतः स क्वचित् स्वकीय एव विशिष्टार्थे संक्रान्तो भवति, क्वचिन्मुख्यार्थस्य सर्वथा हाने तस्य अत्यन्ततिरस्कृतता वा। एवं लक्षणामूलोऽयं ध्वनिर्द्विविधः। अभिधाया मुख्यवृत्तित्वाद् यद्यपि तन्मूलो ध्वनिरेव प्रथमं स्थानमर्हति, तथापि लक्षणामूलयोर्ध्वनिभेदयोः स्वल्पविषयत्वाद् सूचिकटाहन्यायेन तयोरेव प्रथमं प्रतिपादनमुचितम्। लक्षणामूलध्वनेर्द्वौ भेदौ--

ध्वनौ तु लक्षणामूले वाच्यर्थो न विवक्षितः।
संक्रान्तः स्वविशिष्टाऽर्थेऽत्यन्तं वा स्यात् तिरस्कृतः ॥४॥

अर्थान्तरसंक्रान्तो ध्वनिर्यथा--

असमानमिवौजांसि सदसा गौरवेरितम्।
नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान्॥

किरातार्जु० ११.७३॥

अत्र प्रथमः पुमानिति शब्दः पुरुषमात्रार्थकः द्वितीयस्तु श्लाघ्यः पुमानिति तद्गुणविशिष्टपुरुषार्थकः, अन्यथा पुनरुक्तिदोषापत्तिः। एवम्--

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥
काव्यप्र४।२३॥

इह संबोध्यस्य पुंसः पुरतः स्थितत्यैव लभ्यत्वेऽपि 'त्वाम्' इति पदमनुपयुक्तं सद् विशेषतो ममोपदेशपात्रं त्वामिति, वक्तरि विद्यमानेऽपि अहमर्थकम् अस्मीति पदं तवाऽहम् अत्यन्तहिताभिलाषीति। एवं वच्मीति पदं सामान्यतया कथनमात्रपरमपि उपदिशामीति स्वरूपं स्वं स्वं विशिष्टमर्थं प्रति संक्रान्तम्। अस्मीति पदम्

अहमर्थे तिङन्तप्रतिरूपकम् अव्ययं प्रसिद्धम् ।
यथा वा--

हत्वाय देवा असुरान् यदाऽऽयन् ।
देवा देवत्वमभिरक्षमाणाः ।।

ऋ० १०।१५७।४

देवता विश्वेदेवाः, ऋषिः भुवन आप्त्यः साधनो वा भौमनः, छन्दः द्विपदा त्रिष्टुप्--

हत्वायेति-देवास्तेजसा प्रदीप्ताः सुक्षत्रियाः। देवत्वं रक्षमाणाः शत्रुं विजित्याऽपि तत्र निरपराध-प्रजा जनेषु स्त्रीषु च अत्याचारमकुर्वाणाः । असुरान् दुष्टशत्रून् हत्वाय निहत्य क्त्वो यक् (पाणि० ७ १.४७) यदा स्वदेशमायन् आगच्छन्ति तदा ते यथार्था देवाः उच्यन्ते । अत्र द्वितीयं देवा इति पदं विशिष्टदेवपरकत्वात् अर्थान्तरसंक्रमितवाच्यम् ।।

तथा--

परं मृत्यो अनुपरेहि पन्थां
यस्ते अन्य इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि,
मा नः प्रजां रीरिषो मोत वीरान् ।।

ऋ० १०.१८.१

देवता-मृत्युः । ऋषिः-संकसुको यामायनः । छन्दः-त्रिष्टुप् ।

परं मृत्यो इति मन्त्रेऽस्मिन् मृत्योः कश्चित् कल्पितोऽधिष्ठातृदेवश्चेतनव्यक्तिवत् सम्बोध्यते । सर्वदेवमयः परमेश्वरो वा । तदुक्तम्-'....एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।' ऋ०१।१६४।४६। हे मृत्यो! देवयानात्(१) मार्गात् इतरो भिन्नो यस्ते अन्य एव मार्गोऽस्ति पितृयाणाख्यः । परा अस्मत्पराङ्मुखः सन् त्वं तम् मार्गं अन्विहि अनुसर । जितेन्द्रिया योगिनो विद्वांसो हि देवाः । ते येन यानेन जीवनसरण्या यान्ति व्यवहरन्ति तद्देवयानम् । तेन पथा गच्छतो मृत्युंजयान् मृत्युर्न निहन्ति । ते हि स्वेच्छया देहं जहति भीष्मादिवत् । इतरेण पितृयाणाख्येन पथा गच्छतो भोगिनो मर्त्यान् मृत्युर्हन्ति ते हि पुनः पुनर्म्रियन्ते जायन्ते च । हे मृत्यो ! यतो हि त्वं चक्षुष्मान् शृण्वंश्चासि तस्मात् चक्षुष्मते शृण्वते च ते ब्रवीमि । किं ब्रवीमि ? यत् त्वं नः प्रजां संततिपरम्पराम् वीरान् पुत्रांश्च मा रीरिषः मा हिंसीः ।। मृत्यौ चेतनव्यक्तित्वारोपे कृते तस्य विलोकनश्रवणशक्तिमत्त्वं नाऽनुपपन्नम् । इह चक्षुष्मते शृण्वते इति पदे न केवलं नेत्रवत्त्वं श्रवणवत्त्वमात्रमेव वाऽर्थं प्रतिपादयतः किन्तु तयोः प्रकर्षम् । अन्यथा प्रायः सर्वेषामेव प्राणिनां चक्षुरादिमत्त्वादिह तयोः पृथगुपादानं व्यर्थं स्यात् । एवं ब्रवीमीति पदमपि कथनस्य प्रार्थनारूपे स्वविशिष्टार्थे संक्रान्तम् ।

१-अग्नि ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गछन्ति ब्रह्म ब्रह्म विदोजनाः ।।
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ।।
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्यया वर्तते पुनः ।।
भग० गीता ।अ०८।श्लो०२४-२६

२- त्रयस्त्रिशत्त्वेव देवाः इति । कतमे ते त्रयस्त्रिशदिति ? अष्टौ वसवः+एकादशरुद्राः+ द्वादशादित्यास्ते एकत्रिशत्+इन्द्रश्च+प्रजापतिश्चेति त्रयस्त्रिशाविति । अष्टौ वसवः- अग्निः+पृथिवी+ वायुः + अन्तरिक्षम् + आदित्यः+द्यौ+चन्द्रमाः+नक्षत्राणि चेति=८। रुद्राः=पुरुषे१०प्राणाः+एकादश आत्मा=११। आदित्याः=द्वादशमासाः।=३३ ।
बृहदारण्यकोपनि०, अध्याय३।ब्राह्म२,३,४,

तथैव—

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ।
पथो अनक्तु मध्वा घृतेन ।। यजु०अ०२७।मं०१२।।

देवता-विश्वेदेवाः । ऋषिः-अग्निः । छन्दः-वराड्गायत्री ।

तनूनपादसुर इति–तनूनपादग्निरितिशाकपूणिः । नपाद् इत्यनन्तरायाः प्रजाया नामधेयम् । आपोऽत्र तन्व उच्यन्ते, तता अन्तरिक्षे । ताभ्य ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतिभ्य एषः (अग्निः) जायते । निरु०८।२।५। ओषधयः कस्मात् ? ओषम् ऊष्माणं दधतीति । देहसम्बन्धादिह देहे स्थितस्य तापस्य नियतमात्रा जठराग्निर्वा तनूनपात् । स हि तनूंन पातयति पतनाद् रक्षतीत्यर्थः । अथवा–तनू+ऊन+पात् तन्वा ऊनं प्रतिक्षणं क्षीयमाणम् अंशं पाति पूरणात् पालयतीति । भुक्तैरोषधिवनस्पतिभिरेवाऽयमग्निर्देहे जन्यते धार्यते च । सोऽयं तनूनपात् असून् प्राणशक्ति ददातीत्यसुरः । शक्तिदानाद् द्योतनात् क्षुधादेर्दीपनाद्वाऽयमग्निर्देवः । न केवलं देवः प्रत्युत देवेषु देवपदवाच्येषु सर्वेषु प्राणेन्द्रियादिष्वपि देवः विशिष्टो देवः । अस्यैव माहात्म्येन प्राणा बलवन्तः, इन्द्रियाणि च स्वव्यापारक्षमाणि । अयमेव चक्षुषो दीप्तेः मुखस्य च कान्तेः कारणम् । जठराग्निमान्द्ये सर्वं गात्रं मन्दायते । अयमेव विश्वं विविधमन्नपानादिकं[१] विन्दति आत्मसात्करोतीति विश्ववेदाः । उक्तविधोऽयं देवः, नः पथो मध्वा घृतेन च अनक्तु अस्माकं जीवनपथं माधुर्येण स्नेहेन च सिञ्चतु । स्वस्थो जठराग्निरेव मानवस्य देहमनसोरारोग्यहेतुः । अजीर्णग्रस्तो जनोऽकारणक्रोधी उग्रस्वभावश्च भवति । देवो देवेषु देवः इत्यत्र प्रथमं देवपदं द्युतिदानाद् दीपनाद्वा देहाऽग्निपरकम् । द्वितीयं सामान्यतया आत्माग्निप्राणेन्द्रियादिपरकम् । देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये । इति मेदिनी । तृतीयं च तनू निरतिशयशक्तिकान्त्यादिप्रदानसमर्थस्य विशिष्टस्य देहाग्नेर्बोधकम् । तनूनपात्पदस्य व्युत्पत्तिः तन्वां देहे देहिभावमास्थाय न पततीति कर्तुमुचिता । इह देवो देवेषु देव इत्यत्र एकाधिकवर्णयो दकारवकारयो स्तेनैव क्रमेण असकृदावृत्त्या वृत्त्यनुप्रासः । किं च यज्ञमयं त्यागभावनया जीव्यमानं सुखिजीवनरूपं विषयं निगीर्य तस्य विषयिणा मधुना घृतेन च अभेदाऽध्यवसानादतिशयोक्तिरिति । ततश्चोभयोः शब्दार्थाऽलङ्कारयोः परस्परनैरपेक्ष्येण स्थितयोः संसृष्टिः ।

तथा–

ये देवा देवेष्वधि देवत्वमायन्
ये ब्रह्मणः पुर एतारो अस्य ।
येभ्यो न ऋते पवते धाम किंचन,
न ते दिवो न पृथिव्या अधिस्नुषु ।।
यजु० अ०१७।मं०१४।

देवता-प्राणः । ऋषिः-लोपामुद्रा । छन्दः-आर्षी जगती ।

ये देवा देवेष्वधि०–मन्त्रस्यास्य देवता प्राणः । प्राणपदमिह देहात्मरहितप्राणानामसंभवाद्–धर्मधर्मिभावसम्बन्धेन प्राणायामयोगाभ्यासादिभिः सम्यङ्नियन्त्रित–प्राणशक्ति जनं लक्षयति । ये नियन्त्रितप्राणशक्तयो महात्मानः, देवेषु देवोचितविद्यादिसद्गुणसंपन्नेषु जनेष्वपि देवत्वं विशिष्टम् असामान्यं देवत्वमध्यायन् अधिगच्छन्ति अधिकुर्वन्ति वा । ये चास्य ब्रह्मणो ब्रह्मविदां समाजस्य जगतो वा पुर एतारः अग्रगामिनो भवन्ति येभ्यो

१–सोऽहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणाऽपानसमायुक्तः पचाम्यन्नं चतुर्विधम् ।।
भगवद्गीता ।१५.१४।

विना किमपि धाम स्थानं न पवते पवित्रं न जायते। तथाविधा असाधारणप्रभावा महानुभावा न दिवः न द्युलोकादवतरन्ति, न पृथिव्याः न पृथिवीतलमुद्भिद्य निर्गच्छन्ति, न वास्तुषु पर्वतानां सानुषु सानुभ्यः प्रादुर्भवन्ति, प्रत्युत सामान्यजनवत् मातुरेव गर्भाद् जन्म गृह्णन्ति। परस्तात् साधनया उद्योगेन च स्वसमुपार्जितगुणैस्तादृशं सर्वजनपूजनीयं महोच्चैः पदमवाप्नुवन्ति। धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः। इति मेदिनी। अत्रापि देवपदं पूर्वमन्त्रवत् स्वीय एवाऽर्थान्तरे संक्रान्तम्। "स्नुः प्रस्थः सानु रस्त्रियाम्।" इत्यमरः। उव्वटमहीधरौ तु मन्त्रमिमं प्राणपक्षे योजयन्तौ—"ये देवाः प्राणाऽपानादयः पञ्चप्राणाः देवेषु इन्द्रादिषु अधिष्ठातृत्वेन देवत्वम् आयन् प्राप्ताः। इन्द्रादीनामपि प्राणा देवाः। ये अस्य ब्रह्मणः जीवस्य पुर एतारः। प्राणा हि प्राणिनां पुरःसराः। क च येभ्य ऋते यान् प्राणान् विना किंचन धाम किमपि शरीरं न पवते न चेष्टते इत्थंभूता ये प्राणा देवास्ते पुनः क्वाऽऽसते? तत्राह—ते प्राणरूपा देवा न दिवः दिवि स्वर्गे न सन्ति। पृथिव्याः पृथिव्यां भूमावपि च न। सप्तम्यर्थे षष्ठ्यौ। किं तर्हि स्नुषु अधि 'स्नु प्रक्षरणे' स्नुवन्ति क्षरन्ति स्नूनि स्रोतांसि। चक्षुरादीनि प्राणायतनानि तेषूपलभ्यन्ते। तेषां स विशिष्टः प्रदेशः।" इत्याहतुः। धातुपाठे 'स्नु प्रक्षरणे' रूपः कश्चिद् धातुर्नास्ति। स्नु प्रस्रवणे त्वस्ति। किन्तु मन्त्रे स्नु इति पाठदर्शनात् व्याख्येयं नातिरुचिरा प्रतिभातीति विपश्चितः स्वयं प्रमाणम्।

अथ यत्र प्रकृते सर्वथाऽनुपपन्नत्वाद् वाच्यार्थोऽत्यन्ततिरस्कृतो भवति तं लक्षणामूलध्वने द्वितीयं भेदं प्रस्तौति—

उपकृतं बहु तत्र किमुच्यते
सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सखे सदा
सुखितमास्स्व ततः शरदां शतम्॥

काव्यप्रका० ४।२४।

अपकारिणं प्रत्युक्तानि उपकृत-सुजनता-सुखितादीनि पदानि मुख्यार्थबाधात् स्वमर्थं सर्वथा परित्यज्य विपरीतलक्षणया अपकृत—दुर्जनता—दुःखिताद्यर्थान् लक्षयन्ति।

यथा वा—

सुवर्णपुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥

ध्वन्यालोके०॥

पृथिव्यां सुवर्णमयपुष्पाणां, केनचिज्जनेन तेषां चयनस्य चाऽनुपपत्तेः, शूरकृतविद्यसेवाविचक्षणैरनायासेनैव प्रचुरधनोपार्जनं लक्ष्यते, तत्प्रकर्षव्यञ्जनं च गूढं फलम्। "सुवर्णपुष्पिताम्" इति पदम् अत्र काञ्चनकुसुमवतीति रूपं स्वमुख्यमर्थं सर्वथा तिरस्कृत्य विपुलैश्वर्यरूपे अर्थान्तरे संक्रान्तं भवति।

एवम्—

पुष्पिण्यौ चरतो जङ्घे भूष्णुरात्मा फलेग्रहिः।
शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः॥

ऐतरेयब्राह्मणे०।

जङ्घयोः पुष्पित्वमनुपपन्नम्। तेन भ्रमणशीलस्य श्रमरतस्य अप्रमादिनः पुंसः सर्वत्र कृतकृत्यत्वं व्यज्यते। तथा पाप्मनां शयनक्रियाकर्तृत्वं न संभवति। उक्तं तु तत् पाप्मनां निष्क्रियत्वं व्यनक्ति। पाप्मपदमपि पापरूपं स्वमुख्यमर्थं परित्यज्य पापफलं दुःखभोगं लक्षयति।

क्रमशः

सम्पादकीय टिप्पण्यः

चीनदेशस्योत्थानम्

श्रूयते वृत्तपत्रेषु पठ्यते च यत् चीनदेशस्य सर्वक्षेत्रेषु महती समुन्नतिः संजाता । जातीयचारित्र्यमप्यनुकरणीयं समपद्यत । अस्माभिस्तस्य देशस्य यात्रा तु न विहिता परमन्ये यात्रिणः कथयन्ति यत् याचकस्तत्र नामशेषतां यातः । स्वदेहविक्रय जीविन्यः स्वैरिण्यश्चाप्यधुना नावलोक्यन्ते । चौरभयं च कुतो भवेत् वैयक्तिकसम्पत्तेरभावात् । आर्थिकक्षेत्रे स्वावलम्बनं तेषां मुख्योद्देश्यमासीत् परं तदर्थं न कस्यापि समक्षं तेन हस्तप्रसारणं विहितमिति धन्योऽयं देशः । या योजनापद्धतिस्तेनावलम्बिताऽसावैकतः गांधिपद्धतिरेवासीदिति निःसंशयं वक्तुं शक्यते । जनशक्तेरधिकाधिकमुपयोगो विधातव्य इति तेषां दृढनिश्चयः । ग्रामस्तेषां पूर्णतः स्वावलम्बी भविष्यत्यचिरादिति प्रेक्षावतां विचारः । सामान्यजनोपयोगयोग्यानि वस्तूनि देशे सर्वत्र सममूल्यानि स्वल्पमूल्यानि च सन्ति । वेतनादिषु नाधिकं वैषम्यं तत्रेति श्रूयते । सर्वोच्चपदाधिकारिणोऽपि समये-समये कर्मकराणां संघेषु कृषकाणां च समूहेषु प्रविश्य कृष्यादिकं कुर्वन्ति । परमत्र भारते तु वातानुकूलितहर्म्येषु स्थित्वैव कृष्यादिक्षेत्रसम्बद्धसमस्यानां समाधानं विधीयते । महदाश्चर्यं यो देशः सर्वदेशानां गुरुरासीदसौ स्वचरित्रशिक्षणाय चीनादिदेशानां शिष्यत्वमवाप्तुमर्हति ।

मधुशालाजालनद्धा उत्तरप्रदेशीया मत्स्याः

वृत्तपत्रेष्विदं पठित्वा महतीदं मनोव्यथा समजनि यदुत्तरप्रदेशसर्वकारोऽप्यस्मिन् प्रदेशे मधुशालानां जालानि प्रसारयितुं समीहते । यदि सत्यमेतत्तद् धिक्काराईमिदं जघन्यं कार्यम् । विगतकांग्रेसाधिवेशनभाषणेभ्योऽनुमीयते यत् केचन काँग्रेसीया मदिरापाने न कमपि दोषं गणयन्ति । किमयं महात्मगांधिराद्धान्तसम्मतः कांग्रेसः ? पुण्यश्लोकानां महात्मगाँधिनां मन्तव्येभ्यो विसंवदते प्रवृत्तिरेषा शासकानाम् । मधुशालानिर्माणसम्बद्धैषा विचारसरणिः जातेरुन्मूलयित्री राष्ट्रविध्वंसकरी च । मधुपानार्जिता मुद्रा भौतिकोन्नत्यै गणयन्त्येते मुग्धा नेतारः । परं भोगविलासप्रवृत्ता मोहान्धा न विजानन्ति यत् सुरापानेन बुद्धिभ्रंशो जायते बुद्धिनाशात् प्रणश्यति इति भागवतवचनं सदा स्मार्यम् । न केवलं सुरापानमेव देशे प्रससार परमन्यान्यपि गांजाभांगेत्यादीनि मोहान्धकाराणि नैकानि द्रव्याणि प्रचलितानि नैकाश्च मतिविभ्रमकरा यूनां तेजोहरा वलवीर्यविनाशिन्यो गुटिका अपि शत्रुभिः प्रसार्यन्ते, विशेषतः पञ्जाबहरयाणादि प्रदेशेषु । सावहितं श्रृणुत भो राष्ट्रनेतारः अनेन देशस्य क्षात्रशक्तिः ह्रासतां यास्यति ।

साहित्य समीक्षा

संस्कारविधिः

लेखक—स्वामी दयानन्द सरस्वती
प्रकाशक—रामलाल कपूर ट्रस्ट, बहालगढ़, सोनीपत
सम्पादक—श्री युधिष्ठिर मीमांसक

मूल्य सजिल्द १०), अजिल्द ८)

ऋषि दयानन्दकृत संस्कारविधि का
आर्य समाज-शताब्दी संस्करण

श्रीमती माता भागवन्ती जी, धर्मपत्नी श्रीमान् हरिश्चन्द्र जी बत्रा ने अपने होनहार मेधावी व्यवहारपटु दूरदर्शी मितभाषी सत्यवादी सन्मार्गगामी आज्ञाकारी मातृ-पितृ-भक्त प्रभु-भक्त पुत्र सत्यप्रकाश, जिसे १६ वर्ष की अल्पायु में ही अकालमृत्यु ने सहसा उठा लिया, की स्मृति में प्रकाशित कराया है ।

इस संस्करण में पूर्व संस्करणों की अपेक्षा कई विशेषताएं हैं जो कि संस्कार विधि के प्रारम्भ में इस प्रकार दी हैं—

१ सभी संस्करणों से मिलाकर "द्वितीय संस्करण" के आधार पर मूल पाठ का संरक्षण।

२ विविध संस्करणों में हुए परिवर्तनों एवं प्रक्षेपों को दूर करके मूल पाठ का स्थापन ।

३ उद्धृत वचनों का ग्रन्थकाराभिमत शुद्ध पाठ व मूल स्थान का निर्देश ।

४ मूल ग्रन्थ पर लगभग एक सहस्र टिप्पणियां ।

५ प्रथम परिशिष्ट में विविध विषयों पर ३६ विवेचनात्मक टिप्पणियां ।

६ उद्धरण की सुविधा के लिए प्रति पृष्ठ, पंक्ति-संख्या का निर्देश ।

७ विषय की सुविधा के लिए ग्रन्थ का छोटे-छोटे सन्दर्भों में विभाजन वा अवान्तर शीर्षकों का निर्देश ।

८ विविध संस्करणों का विवेचनात्मक सम्पादकीय ।

९ ग्रन्थ का ऐतिहासिक विवरण ।

१० अन्त में अत्युपयोगी १२ विशिष्ट परिशिष्ट (=सूचियां)

११ सुन्दर शुद्ध मुद्रण, बढ़िया कागज, पक्की सुन्दर जिल्द ।

१२ लागतमात्र मूल्य—सजिल्द १०रु०, अजिल्द ८ रु० (महंगाई के कारण)

भगवद्दत वेदालंकार

जौलाई १९७४ से आगे—

सोम राजा का आतिथ्य और अग्निमन्थन

श्री भगवद्दत्त वेदालंकार

हे सोम ! तू आपीन हो, तेरा वर्षणशील तथा बलप्रद अंश सब ओर से आकर एकत्रित होवे। और वाज अर्थात् वेग का संगम अर्थात् मेल कराने वाला हो ।

यह सोम द्युलोक में सर्वत्र अभिव्याप्त है और मानव–देह में भी रक्त द्वारा सर्वत्र परिभ्रमण करता है। ये दोनों प्रकार के सोम मस्तिष्क में एकत्रित होवें । यह प्रार्थना की गई है ।

